National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(59): 278-279
© 2025 NJHSR
www.sanskritarticle.com

**डा. संकल्पमिश्र:**
सहायकाचार्य अध्यक्षश्च,
वेद-विभाग:,
महर्षिपाणिनिसंस्कृत एवं वैदिक-विश्वविद्यालय:, उज्जयिनी

**Correspondence:**
**डा. संकल्पमिश्र:**
सहायकाचार्य अध्यक्षश्च,
वेद-विभाग:,
महर्षिपाणिनिसंस्कृत एवं वैदिक-विश्वविद्यालय:, उज्जयिनी

# मालविकाग्निमित्रे सन्निहितवायुतत्त्वम्

**डा. संकल्पमिश्र:**

**शोधसार:**
भारतीयसंस्कृतौ दर्शनपरम्परायां वा प्रायश: पंचमहाभूतानां चर्चा बहुत्र समुपलभ्यते। कालिदास: संस्कृतसाहित्ये सुप्रथित: काव्यप्रणेता वर्तते। कालिदासप्रणीतासु अन्यतमा रचना वर्तते मालिविकाग्निमित्रम्। अस्यां रचनायां पंचमहाभूतेषु एकस्य अन्वेषणमत्र मया कृतम्। अत: यत्र कुत्रापि प्रत्यक्षरीत्या अप्रत्यक्षरीत्या वा वायो: सन्दर्भ: प्राप्यते तेषां सन्दर्भाणामत्र सुविचारपूर्वकम् उपस्थापनं कृतम्।

**कूटशब्दा:**
मालविकाग्निमित्रम्, पंचमहाभूतानि, वायुतत्त्वम्, कालिदास:।

**प्रस्तावना**

भारतीयसंस्कृतसाहित्यमहोदधौ कविकुलगुरुकालिदासप्रणीतासु रचनासु पंचमहाभूतानां समुल्लेख: यत्र तत्र प्रत्यक्षतया परोक्षतया वा दृश्यते। यथा कालिदासस्य सर्वाधिकप्रसिद्धरचनायाम् अर्थात् अभिज्ञानशाकुन्तले आदौ नान्दीपाठे एव प्राप्यते। संस्कृतसाहित्ये वायो: वर्णनं विभिन्नेषु रूपेषु प्राप्यते। कालिदासस्य प्रमुखरचनासु यथा – कुमारसंभवे अभिज्ञानशाकुंतले अथ च रघुवंशेऽपि वायो: विशेषोल्लेख: विद्यते। कालिदासेन वायो: उपयोग: प्रकृति-मनुष्ययो: संबंधप्रकटीकरणाय कृतम्। कालिदासस्य प्रथमनाटकत्वेन मालविकाग्निमित्रम् सुप्रसिद्धम्। नाटकमिदं राजनैतिकदृष्ट्या अथ च सामाजिकदृष्ट्या महत्त्वपूर्णस्थानमाधत्ते। अस्मिन् प्रकृते: तत्त्वानां प्रतीकात्मक: अथ च यथार्थप्रयोग: दर्शनीय: वर्तते। प्रकृतशोधपत्रे मालविकाग्निमित्रे वर्णितवायुतत्त्वस्य नैकतथ्यानां योजनपूर्वकं विमर्श: करिष्यते।

**वायुतत्त्वं नाम किम्?**

भारतीयदार्शनिकपरम्परायां पंचमहाभूतानां(पृथ्व्यप्तेजोवायुराकाशानाम्) स्वीकृति: सर्वत्र दृश्यते स्वीक्रियते च। एभि सकलस्य जगत: निर्मिति: अवगम्यते। वायुतत्त्वं गतिशीलताया: जीवनस्य चेतनायाश्च प्रतीकत्वेन स्वीक्रियते। एतत् मानवजीवनाय अनिवार्यम्।

**मालविकाग्निमित्रे वायुतत्त्वस्य प्रतीकात्मक: प्रयोग:**

नाटकेऽस्मिन् वायुतत्त्वं प्राकृतिकेषु सांस्कृतिकेषु संदर्भेषु बहुत्र प्रतीकात्मकरूपेण प्राप्यते। एतस्य नैकेष्वंशेषु वायोरुल्लेख: दृश्यते, अनेन न केवलं दृश्य-श्रव्य-प्रभावोत्पद्यते अपि तु पात्राणां मनस: अथ शरीरस्य च अवस्थाया: प्रदर्शनमपि दृष्टिपटले आयाति।

यथा - मालविकाग्निमित्रे सेविका बकुलावलिका प्रथमे अंके पृच्छति तदा गणदास: कथयति ***इदानीमेव पंचांगामभिनयमुपदिश्य मया विश्रम्यतामित्यभिहिता दीर्घिकावलोकनगवाक्षगता प्रवातमासेवमाना तिष्ठति***[1]। अत्र वायुसेवनस्य चर्चा प्राप्यते।

तृतीयांके राजा प्रमदवनस्य मार्गविषये यदा विदूषकं पृच्छति। तदा विदूषक: कथयति – ***नन्वेतत् प्रमदवनं पवनचलिताभि: पल्लवांगुलीभिरध्वरयतीवभिरध्वरयतीव भवन्तम्। तत्प्रविशतु भवान्।***

तदा राजा उत्तरयति – ***(स्पर्शं रूपयित्वा) अभिजात: खलु वसन्त:। सखे पश्य –***

**आमत्तानां श्रवणसुभगै: कूजितै: कोकिलानां**
**सानुक्रोशं मनसिजरुज: सह्यतां पृच्छतेव।**
**अंगे चाम्रप्रसवसुरभिर्दक्षिणो मारुतो मे**
**सान्द्रस्पर्श: करतल इव व्यापृतो माधवेन[2]।।**

अत्र वायो: साम्यं हस्तस्पर्शवत् प्राप्यते। यथा हस्तस्पर्श: सुखदायक: तथैव अनुभूति: वायुना प्राप्यते।

एवमेव अस्मिन्नेव अंके अग्रेऽपि राजा विदूषकेन सह संवादावसरे कथयति – ***नैतावता भवन्त प्रसन्नतर्कं मन्ये। कुत: -***

**वोढा कुरबकरजसां किसलयपुटभेदशीकरानुगत:।**
**अनिमित्तामुत्कण्ठामपि जनयति मलयवातोऽयम्[3]।।**

श्लोकेस्मिन् मलयवातस्य चर्चा श्रूयते। वायुप्रभावात् औत्सुक्यं जायते। चतुर्थे अंके प्रतीहारी(प्रविश्य) राजानं सूचयन् कथयति – ***देव! प्रवातशयने देवी निषण्णा रक्तचन्दनधारिणा परिजनहस्तगतेन चरणेन भगवत्या कथाभिर्विनोद्यमाना तिष्ठति*** [4]। अत्रापि प्रकोष्ठस्य वायुयुक्तता सूचिता वर्तते।

एवमेव चतुर्थे अंके एव जयसेना राजानं सूचयति – ***देव कुमारी वसुलक्ष्मी: कन्दुकमनुधावन्ती पिंगलवानरेण बलवदुत्त्रासितां-कनिषण्णा देव्या: प्रवातकिसलयमिव इव वेपमाना इदानीमपि प्रकृतिं न प्रतिपद्यते*** [5]।

अत्र भीतियुक्तायै बालिकायै प्रभूतवातयुक्तस्य स्थानस्य चर्चा प्राप्यते। अनेन प्राणेभ्य: स्थैर्याय च वायुरावश्यक: इति ज्ञायते।

नाटकेऽस्मिन् पात्राणां भावानात्मकस्थितिं वायुसन्दर्भे अवगमनेन ज्ञायते यत् वायो: शारीरिक-मानसिकस्वास्थ्ये च गहनप्रभाव: भवति। यथा यदा मालविकाग्निमित्रयो: प्रेम जायते तदा वायो: प्रभाव: तयो: भावान् शारीरिकरूपेणापि प्रकटयति।

**वायो: प्राकृतिकसंदर्भ:**

कालिदासस्य साहित्यिकप्रतिभाया: महत्वपूर्णम् अंगमिदं वर्तते यत् स: प्रकृते: विभिन्नतत्त्वानि सांस्कृतिकसन्दर्भे अथ च मानवमनोविज्ञानस्य सन्दर्भे योजयति। अत्र वसंततर्तो: वर्णनं वायो: महत्त्वं प्रकटयति। बहारस्य आगमने सुरभि: अथ च वनेषु प्रवाहयुतमंदवायु: न केवलं दृश्यं सुन्दरं विदधाति अपि तु प्रेमभावनामपि पोषयति। यथा यदा मालविकाग्निमित्रयो: प्रेमप्रसंग: आयाति तदा वायो: संदर्भ: प्रकृते: सौंदर्यं प्रेम्ण: ऊष्मां च प्रकटयति। एतत् न केवलं बाह्यावरणस्य चित्रणं करोति अपि तु प्रेम्ण: कामनाया: प्रतीकत्वेन प्रकाशे आयाति।

**वायो: मानसिक: भावनात्मकप्रभाव:**

वायोरुल्लेख: मनोवैज्ञानिकरूपेण महत्त्वपूर्ण:। नाटकस्य बहुषु स्थलेषु वायो: संदर्भै: पात्राणां मानसिकस्थिते: भावनानां च वर्णनं कृतं वर्तते। यथा वायो: गतिवर्णनं पात्राणां मध्ये विद्यमानस्य अस्थैर्यम् अथ च तेषां भावनानां उच्चावचां प्रदर्शयति। अनेन ज्ञायते यद्वायु: प्राकृतिकतत्त्वं नास्ति अपि तु मनुष्यस्य मानसिकस्थितावपि प्रभावं जनयति। यदा पात्राणि अधीराणि भवन्ति तदा तानि परित: विद्यमानासु वायुगतिषु परिवर्तनमायाति।

**वैज्ञानिकदृष्ट्या वायुतत्वम्**

वायुं विना जीवनकल्पना असम्भवा। वायुतत्त्वस्य महत्त्वपूर्णभाग: प्राणवायु: (ऑक्सीजन इति) वर्तते। एतत् श्वसनप्रक्रियाया: आधारभूत:।

**वायुमंडलीयसंरचना जीवनं च**

वायुमंडलस्य संरचनासु 78% नाइट्रोजनइत्यस्य, 21% ऑक्सीजन इत्यस्य अथ च शिष्टान्यानि। एषा संतुलितसंरचना जीवनाय अनिवार्या। ऑक्सीजन इत्यस्य प्रमुखकार्यं श्वसनक्रियाया-मूर्जोत्पादनम्। यदा कालिदास: वसंततर्तो: सुरभिं वर्णयति तदा एष: साहित्यिकालंकार: नास्ति अपि तु एतस्य वैज्ञानिकाधारोऽपि वर्तते। पुष्पसुरभे: प्रमुखकारणं वाष्पशीलयौगिका:।

**उपसंहार:**

आहत्य सर्वं वयम् अवगन्तुं शक्नुम: यत् पंचमहाभूतेषु अन्यतम: वायो: वर्णनं प्रत्यक्षरूपेण तु सर्वत्र कालिदासप्रणीतरचनासु दृश्यते परम् अप्रत्यक्षतया अपि बहुत्र प्राप्यते। कुत्रचित् शीतलवायुप्रवाहमाध्यमेन प्रेमानुभूति: भवति कुत्रचित् मानसिक-शान्तिरपि भवति। इत्थं वायु: न केवलं प्राणवायुत्वेन ज्ञायते अपि तु विविधभावानां प्रदर्शक: अपि वर्तते। जीवनाय यथा भोजनमावश्यकं तथैव पंचमहाभूतेषु अन्यतम: वायु: अपि आवश्यक:। इति शम्

**पादटिप्पण्य:-**

[1] मालविकाग्निमित्रम्, प्रथमांक:

[2] मालविकाग्निमित्रम् 3.4

[2] मालविकाग्निमित्रम् 3.9

[4] मालविकाग्निमित्रम्, चतुर्थांक:

[5] मालविकाग्निमित्रम्, चतुर्थांक: